संरक्ताम्बोधिस्थपोतोल्लसदरुणसरोजाधिरुढ़ा, कराब्जैः पाशंकोदंड मिक्षुद्भव गुणमणिमप्यंकुशं पंचवाणान् । विभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षो रुहाढ्या देवी, वालार्क वर्णा भवतु सुखकरी प्राणशक्तिः परा नः।।

इति ध्यानम्।

पंचोपचारैर्मनसाभ्यर्च । हृदि शिरसि वा हस्तं निधाय त्रि; सकृत्वा मंत्रं पठेत्।

आं ह्रीं क्रों अं यं रं लं वं शं षं सं सोहं ॐ क्षं सं हं स: ह्रीं ॐ हंस: मम प्राणा: इह प्राणा:।

आं ह्रीं क्रों २० मम जीव इह स्थित:

आं ह्रीं क्रों २० मम सर्वाङ्गाणि ।

ॐ २० मम वाङ्मनसस्चक्षु श्रोत्र घ्राण – प्राणा: इह आगत्य सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ क्षं हं सं हं स: ह्रीं ॐ । इति प्राणप्रतिष्ठा । स्वरै पूरक: कादिवर्गपंचकेन कुम्भक:। यादि दशवर्णैरेंचक: इति प्राणानायम्य –

अस्य श्री मातृकान्यासमन्त्रयस्य ब्रह्मऋषयो नम: शिरसि । गायत्री छन्दसे नमो मुखे। मातृका सरस्वत्यै नम: हृदि । विन्दुभ्य: हलभ्यो बीजेभ्यो नम:- गुह्ये । स्वरेभ्य: शक्तिभ्यो नम:- पादयो:। कीलकेभ्यो नम: - नाभौ। सर्वाङ्गे व्यापकम्।

अंतर्मातृकान्यासे वहिर्मातृकान्यासेषु च विनियोगाय नम: करसंपुटे न्यस्य–।

ॐ अं कं खं गं घं ङं आं अंगुष्ठा०।

ॐ इं चं छं जं झं ईं तर्जनीभ्याम् ०।

ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्याम् ०

ॐ एं तं थं दं धं नं ऐं अनामिकाभ्याम् ०।

ॐ ऊं पं फं वं भं मं औं कनिष्ठिकाभ्याम् ०।

ॐ अं यं रं लं वं शं षं हं क्षं लं अ: करतल करपृष्ठाभ्याम् नम: एवं हृदयादि०।

अथ ध्यानम्

पंचाशद्वर्णभेदैर्विहितवदन दो: पादहृत्कुक्षिवक्षोदेशाम् ।
भास्कत्वकपर्दां कलितशशि कला मिन्दुकुंदावदागाम् ।।
अक्षस्त्रककुम्भचिंतालिखितवरकरांत्रीक्षणां पद्मसंस्थाम् ।

अथाकल्पामतुष्ठ स्तन-जघन-भरां भारतीं तां नमामि ।।

दक्षोर्ध्वकरमारभ्य दक्षाधः कर पर्यन्तं आयुध ध्यानम् ।

ततः विशुद्धिपद्ममूर्ध्व मुखं प्रागादि प्राग दक्षिण्येन ।

ॐ अं नमः हंसः सोहमिति मंत्रानकारादि विसर्गान्त स्वरसहितान्षोडशन्यसेत्।

एवमनाहते कं नमः हंसः सोहमित्यादीन् ठकारांत वर्ण सहितान्द्वादश

मणिपुरे डं नमः हंसः सोहं इत्यादि फकारान्त वर्ण सहितान् दश ।

स्वाधिष्ठाने प्रथमदलत्रये बं नमः।

भं नमः मं नमः ।

इति न्यस्य ततः षट्स्वपि दलेऽष्टेषु हंसः सोहमिति मंत्रशेषं न्यस्य चरणदलत्रये यं नमः रं नमः लं नमः इति न्यसेत् ।

मूलाधारे वं नमः शं नमः षं नमः सं नमः इति न्यस्य हंसः सोहमिति शेषं ततो न्यसेत् ।

आज्ञाचक्रे हं नमः हंसः सोहं क्षं. नमः हंसः सोहमिति न्यस्य इत्यंतर्मातृका न्यासः। ततः क्षं नमः ।

लं हं सं षं शं वं लं रं यं मं भं वं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ऐं एं ॡं ऌं ॠं ऋं ऊ ऊं उं ईं इं आं अं नमः ललाटे।

।। इति षष्ठः पटलः।।

अथ सप्तमो पटल :

श्री गणेशादि षोढ़ान्यास:

ततः क्षं नमः इत्यादि मस्तक पर्यन्तम् ।
लं हृदयादि नाभिपर्यन्तं इत्यादि विपरीतं ।
अं नमः इत्यंतं संध्या न्यासोक्तस्थलेषु न्यसेत् ।

इति संहार न्यास: ।

एवमकारादिक्षकारान्सविसर्गान्ततत्स्थानेषु न्यसेत् ।

इति सृष्टि न्यास: ।

पुनरपि डकारादि ठकरांतान् तत्तत्स्थानेषु विन्दुविसर्गोभय युक्तान् न्यसेत् ।

इति स्थिति न्यास: ।

अथ लघुषोडान्यास:

श्री गुरूपादुकां ध्यात्वा० ।

श्री गुरू परमानन्द वंदे स्वानंदविग्रहं ।
यस्य सन्निधिमात्रेण चिदानन्दायते तनुः ।।

इति नत्वान्यासमारभेत् ।

श्री गणेशादि षोढान्यासः

अस्य श्रीगणेशादि षोडान्यास दक्षिणामूर्तये ऋषये नमः शिरसि पंक्तिछन्दसे नमो मुखे । श्रीमहात्रिपुरसुन्दर्यै नमः । मम समस्तपापक्षयार्थे श्रीमहात्रिपुरसुन्दरी मंत्रानुष्ठानांगत्वेन लघु षोढ़ान्यासे विनियोगाय नमः ।

ऊँ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं ऐं अंगुष्ठाभ्याम् ।

ऊँ ऐं ह्रीं श्रीं इं चं ५ई क्लीं तर्जनीभ्याम् ।

४ उं टं ५ ऊं सौः मध्यमाभ्याम् ।

४ एं तं ५ ऐं सौः अनामिका० ।

४ ओं पं ५. औं क्लीं कनिष्ठिका० ।

४ अं यं १० अः ऐं करतलकरपृष्ठाभ्याम् नमः ।

एरं हृदयादि ध्यानम् ।

उद्यत् भानुसहस्राभांपीनोन्नतपयोधराम् ।

रक्तमाल्यांबरालेपां रक्तभूषणभूषिताम् ।।

पाशांकुश धनुर्बाण भास्वत्पाणिचतुष्ट्याम् ।

रक्तनेत्रत्रयां स्वर्णमुकुटोद्भासिकांचिकाम् ।।

गणेशग्रहनक्षत्र योगिनीराशिरूपिणीम् ।

देवीं पीठमयीं ध्यायेन्मातृकां सुन्दरीपराम् ।।

इति ध्यात्वा न्यसेत् ।

तरुणारुण संकाशान् गजवक्त्रांस्त्रिलोचनाम् ।

पाशांकुशवराभीतिकरान् शक्तिसमन्वितान् ।।

इति ध्यात्वा ।

अं श्रीयुक्ताय विघ्नेशाय नमः । शिरसि ।।

[ऐं ह्रीं श्रीं[१] अं श्रीयुक्ताय विघ्नेशाय नमः । शिरसि ।।]

इति ललाटस्थानानि मुद्राश्च बहिर्मातृकावत् ।

१.नित्योत्सवमें ऐं ह्री श्रीं अं श्रीयुक्तायविघ्नेशाय नमः । ऐसा दिया गया है।

आं ह्रीं युक्ताय विध्नराजाय नमः । मुखवृत्ते ।।

अं इं तुष्टियुक्ताय विनायकाय० । दक्षनेत्रे ।।

ईं शान्तियुक्ताय शिवोत्तमाय० । वामनेत्रे ।।

उं पुष्टियुक्ताय विध्नकर्त्रै० । वामकर्णे ।।

ऊं सरस्वतीयुक्ताय विग्रहते न० । दक्षकर्णे ।।

ऋं रतियुक्ताय विध्नराजाय० । दक्षनासापुटे ।।

ॠं मेधायुक्ताय गणनायकाय० । वामनासापुटे ।।

लृं कांतियुक्ताय एकदन्ताय० । दक्षगण्डे ।।

ॡं कामिनीयुक्ताय द्विदन्ताय० । वामगण्डे ।।

एं मोहिनीयुक्ताय गजवक्त्राय० । उर्ध्वोष्ठे ।।

ऐं जटयुक्ताय निरंजनाय० । अधरोष्ठे ।।

ओं तीब्रायुक्ताय कन्दर्पभृते न० । उर्ध्वदन्त पंक्तौ ।।

औ ज्वालिनीयुक्ताय दीर्घमुखाय० । अधोदन्तपंक्तौ ।

अं नंदायुक्ताय शंकुकर्णाय० । जिह्वाग्रे ।।

अः सुरसायुक्ताय कण्ठे वृषध्वजाय० ।

कं कामरूपिणी युक्ताय गणनाथाय नमः० । दक्षावाहुमूले ।।

खं शुकीयक्ताय गजेन्द्राय० । — दक्षकूर्परे ।।

गं जयिनीयुक्ताय शूर्पकर्णाय०। — दक्षमणिवन्धे ।।

घं सत्यायुक्तायत्रिलोचनाय० । — दक्षकराङ्गुलिमूले ।।

ङं विध्नेशी युक्ताय लंबोदराय० । — दक्षकराङ्गुल्यग्रे ।।

चं सुरूपायुक्ताय महानादाय० । — वामबाहुमूले ।।

छं कामदायुक्ताय चतुर्मूते० । — वामकूर्परे ।।

जं मदविह्वलायुक्ताय सदाशिवाय० । — वाममणिवन्धे ।।

झं विकटायुक्तायामोदाय० । — वामकराङ्गुलिमूले ।।

ञं पूर्णायुक्ताय दुर्मुखाय० । — वामकराङ्गुल्यग्रे ।।

टं भूतिदायुक्ताय सुमुखाय० । — दक्षोरुमूले ।।

ठं भूमियुक्ता प्रमोदनाय० । — दक्षजानुनि ।।

डं सत्यायुक्ताय एकपादाय० । — दक्षगुल्फे ।।

ढं रमायुक्ताय द्विजिह्वाय० । — दक्षपादाङ्गुलिमूले ।।

णं मानुषीयुक्ताय शूराय० । दक्षपादाङ्गुल्यग्रे ।।

तं मकरध्वजयुक्ताय वीराय० । वामोरुमूले ।।

थं वीरिणी युक्ताय षण्मुखाय० । वामजानुनि ।।

दं भृकुटि युक्ताय वरदाय० । वामगुल्फे ।।

धं लज्जायुक्ताय वामदेवाय० । वामपादाङ्गुलिमूले ।।

नं दीर्घघोणायुक्ताय वक्रतुण्डाय० । वामपादाङ्गुल्यग्रे ।।

पं धनुर्धरायुक्ताय द्विरंडकाय[१] नमः । दक्ष पार्श्वे ।।

फं यामिनीयुक्ताय सेनान्यै नमः । वामपार्श्वे ।।

बं रात्रियुक्ताय ग्रामण्ये नमः । पृष्ठे ।।

भं चन्द्रिका युक्ताय मत्ताय नमः० । नाभौ ।।

मं शशिप्रभायुक्तायं विमत्ताय० । जठरे ।।

यं लोलायुक्ताय मत्तवाहनाय० । — हृदये ।।

रं चपलायुक्ताय जटिने नमः । — दक्षस्कन्धे ।।

लं ऋद्धियुक्ताय मुंडिने नमः । — गलपृष्ठ-ककुदि ।।

वं दुर्भगायुक्ताय खड्गिने नमः । वाम स्कन्धे ।।

शं सुभगायुक्ताय वरेण्याय० । हृदयादिदक्षकराङ्गुल्यन्तम् ।।

षं शिवायुक्ताय वृषकेतनाय० । हृदयादिवामकराङ्गुल्यन्तम् ।।

सं दुर्गायुक्ताय भक्ष्यप्रियाय० । हृदयादिदक्षपादाङ्गुल्यन्तम् ।।

---

१. (नित्याषोऽशिकार्णवे - द्विरतुण्डकाय नमः - इति पाठः)

हं कालीयुक्ताय गणेशाय० । हृदयादिवामपादाङ्गुल्यन्तम् ।।
लं कालकुब्जिकायुक्तायमेघनादाय० । हृदयादिगुह्यान्तम् ।।
क्षं विघ्नहारिणीयुक्ताय गणेश्वराय० । हृदयादिमूर्धान्तम् ।।

इति गणेश न्यासः ।

अथ ग्रह न्यासः

रक्तं श्वेतं तथारक्तं श्यामं पीतं च पांडुरम् ।
कृष्णं धूमं धूम-धूम्रं भावयेत् - रविपूर्वकात् ।।
कामरूपधरानदेवान् दिव्यांबरविभूषितान् ।
वामोरून्यस्त हस्तांश्च दक्षहस्तवरप्रदान् ।।

इति ध्यात्वा

अं १६ सूर्याय नमः — हृदयाधः ।
पं ४ चन्द्राय नमः —भ्रूमध्ये ।
कं ५ भौमाय० — लोचनयोः ।
चं ५ बुधाय० — हृदयोपरि चोरकूपाधः ।
टं ५ वृहस्पतये नमः — कंठदेहे ।
त ५ शुक्राय० — हृदये ।
पं ५ शनैश्चराय नमः — नाभौ ।
शं ४ राहवे नमः — मुखे ।
लं क्षं केतवे० — गुदे

इति ग्रह न्यासः ।

'ज्वलत्कालानल प्रख्यावरदाभयपाणयः ।
नति पाण्योऽश्विनी पूर्वाः सर्वाभरणभूषिताः ।।'

इति ध्यात्वा

अं आ अश्विन्यै नमः — ललाटे ।

इं भरण्यै नमः — दक्ष नेत्रे ।

ईं उं ऊं कृत्तिकायै नमः — वामनेत्रे ।

ऋं ॠं लृं लॄ रोहिण्यै० — दक्षकर्णे ।

एं मृगशीर्षे० — वाम कर्णे ।

ऐं आद्रायै० — दक्षनासापुटे ।

ओं औं पुनर्वसवे नमः — वामनासापुटे ।

कं पुष्याय नमः— कंठे ।

खं गं आश्लेषायै न० — दक्ष स्कन्धे ।

घं ङं मघायै० — वाम स्कन्धे ।

चं पूर्वाफाल्गुन्यै न०— पृष्ठे ।

छं जं उत्तराफाल्गुन्यै न०— दक्ष कूर्परे ।

झं ञं हस्तायै० — वाम कूर्परे ।

टं ठं चित्रायै० — दक्षमणिबन्धे ।

डं स्वात्यै०— वाम मणिबन्धे ।

ढं णं विशाखायै० — दक्षहस्ते ।

तं थं दं अनुराधायै० — वामहस्ते ।

धं ज्येष्ठायै नमः — नाभौ ।

नं पं फं मूलाय० — कटिबन्धे ।

बं पूर्वाषाढ़ायै०— दक्षोरौ ।

भं उत्तराषाढ़ायै०— दक्षोरौ ।

मं श्रवणाय०— दक्ष जानुनि ।

यं रं धनिष्ठायै० — वामजानु० ।

लं शततारकायै० — दक्षजंघायां ।

वं शं पूर्वाभाद्रापदायै० — वाम जंघायां ।

षं सं हं उत्तर भाद्रपदायै — दक्ष पादे ।

लं क्षं अं अः रेवत्यै नमः — वामपादे ।

इति नक्षत्र न्यासः ।

अथ योगिनी न्यासः

ग्रीवा स्थाने विशुद्धौ नृपदलकमले श्वेतरक्तां त्रिनेत्राम् ।

हस्तैः खट्वांग खड्गौ त्रिशिखमपि महाचर्मसंधारयंतीम् ।

त्वक्स्थां वंदेऽमृताद्यैः परिवृतवपुषं डाकिनीं वीरवंद्याम् ।।

त्वक्स्थां वंदेऽमृताद्यैः परिवृवपुषं डाकिनीं वीरवंद्याम् ।।

इति ध्या०। ।

डां डीं डमल वरयूं डाकिन्यै नमो —

ह्रीं श्रीं अं आं १६ मांरक्ष २ त्वगात्मने नमः ।

इति डाकिनीं षोडषाक्षरकर्णिकायां विन्यस्य तद्दलेष्वमृतादिकानंतर्मातृकावन्नयसेत्।

अं अमृतायै नमः ।

आं आकर्षिण्यै नमः ।

इं इन्द्राण्यै नमः ।

ईं ईशान्यै नमः ।

उं उमायै नमः ।

ऊं ऊर्ध्वकेशायै नमः ।

ऋं ऋद्धिदायै नमः ।

ॠं ॠंकारायै नमः ।

ऌं ऌंकारायै नमः ।

ॡं ॡंकारायै नमः ।

ऐं एकपादायै नमः ।

ऐं ऐश्वर्यात्मिकायै नमः ।

ऊँ ऊँकार्यै नमः ।

औं औषध्यै नमः ।

अं अंबिकायै नमः ।

अः अक्षरायै० ।

ततः—

हृत्पद्मे भानुपत्रे द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णाम् ।
अक्षं शूलं कपालं डमरुमपिभुजैर्धारयंतींत्रिनेत्राम् ।।
रक्तस्थांकालरात्रिप्रभृतिपरिवृतांस्निग्धभक्तैकसक्ताम् ।
श्रीमद्वीरेन्द्रवंद्यामभितफलदां राकिनीं भावयामः ।।

·इति ध्या०-

रा रीं र म ल व र यूं राकिन्यै नमो ह्रीं श्रीं कं १ २ मां रक्ष २ असृगात्मने नमः ।

इत्यनाहतकर्णिकायां विन्यस्यान्तर्द्दलेषु कालरात्र्यादि०

कं कालरात्र्यै नमः ।

खं खंडिनायै नमः ।

गं गायत्र्यै नमः ।

घं घंटाकर्षिण्यै नमः ।

ङं ङार्णायै नमः ।

चं चंडायै नमः ।

छं छायायै नमः ।

जं जयायै नमः ।

झं झंकारिण्यै नमः ।

ञं ज्ञानरूपायै नमः ।

टं टंकहस्तायै नमः ।

ठं ठंकारिण्यै नमः ।

ततः -

दिक्पत्रेनाभिपद्मे त्रिवदनविलसद्दंष्ट्रिनीं रक्तवर्णाम् ।
शक्तिं दंभोलिदंडावभयमपि भुजैर्धारयन्तीं महोग्राम् ।।
डामर्याद्यैः परितां पशुजनभयदां मांसधात्वैकनिष्ठाम् ।
गौडान्नासक्त चित्तां सकलसुखकरीं लाकिनीं भावयामः ।।

इति ध्या०

लां लीं ल म र व र यूं लाकिन्यै नमो ह्रीं श्रीं उं १० मां रक्ष २ मांसात्मने नमः ।

इति मणिपूरंकर्णिकायां न्यस्य तद्दलेषु डामर्यादि० ।

डं डामर्यै नमः ।

ढं ढंकारिण्यै नमः ।

णं णांर्णायै नमः ।

तं तामस्यै नमः ।

थं स्थाण्यै नमः ।

दं दाक्षाण्यै नमः ।

धं धात्र्यै नमः ।

नं नंदायै नमः ।

पं पार्वत्यै नमः ।

फं फट्कारिण्यै नमः ।

ऐं एकपादायै नमः ।

ऐं ऐश्वर्यात्मिकायै नमः ।

ऊँ ऊँकार्यै नमः ।

औं औषध्यै नमः ।

अं अंबिकायै नमः ।

अः अक्षरायै० ।

ततः—

हृत्पद्मे भानुपत्रे द्विवदनलसितां दंष्ट्रिणीं श्यामवर्णाम् ।

अक्षं शूलं कपालं डमरुमपिभुजैर्धारयंतींत्रिनेत्राम् ।।

रक्तस्थांकालरात्रिप्रभृतिपरिवृतांस्निग्धभक्तैकसक्ताम् ।

श्रीमद्वीरेन्द्रवंद्यामभितफलदां राकिनीं भावयामः ।।

इति ध्या०-

रा रीं र म ल व र यूं राकिन्यै नमो ह्रीं श्रीं कं १ २ मांरक्ष २ असृगात्मने नमः ।

इत्यनाहतकर्णिकायां विन्यस्यान्तर्द्दलेषु कालरात्र्यादि०

कं कालरात्र्यै नमः ।

खं खंडिनायै नमः ।

गं गायत्र्यै नमः ।

घं घंटाकर्षिण्यै नमः ।

ङं डार्णायै नमः ।

चं चंडायै नमः ।

छं छायायै नमः ।

जं जयायै नमः ।

झं झंकारिण्यै नमः ।

ञं ज्ञानरूपायै नमः ।

टं टंकहस्तायै नमः ।

ठं ठंकारिण्यै नमः ।

ततः-

दिक्पत्रेनाभिपद्मे त्रिवदनविलसद्दंष्ट्रिनीं रक्तवर्णाम् ।
शक्तिं दंभोलिदंडावभयमपि भुजैर्धारयन्तीं महोग्राम् ।।
डामर्याद्यैः परितां पशुजनभयदां मांसधात्वैकनिष्ठाम् ।
गौडान्नासक्त चित्तां सकलसुखकरीं लाकिनीं भावयामः ।।

इति ध्या०

लां लीं ल म र व र यूं लाकिन्यै नमो ह्रीं श्रीं उं १० मां रक्ष २ मांसात्मने नमः ।

इति मणिपूरकर्णिकायां न्यस्य तद्दलेषु डामर्यादि० ।

डं डामर्यै नमः ।

ढं ढंकारिण्यै नमः ।

णं णांणर्यै नमः ।

तं तामस्यै नमः ।

थं स्थाण्यै नमः ।

दं दाक्षाण्यै नमः ।

धं धात्र्यै नमः ।

नं नंदायै नमः ।

पं पार्वत्यै नमः ।

फं फट्कारिण्यै नमः ।

ततः—

स्वाधिष्ठानाख्य पद्मे रसदललसिते वेदवक्त्रां त्रिनेत्राम् ।

हस्ताभ्यां धारयन्तीं त्रिशिखगुणकपालाभयान्याञवर्गाम् ।।

मेदोधातुप्रतिष्ठामलिपदमुदितांवंधिनीं मुख्ययुक्ताम् ।

पीतां दध्योदनेष्टामभिमत फलदां काकिनीं भावयामः ।।

इति ध्या०-

कां कीं कमल व र यूं काकिन्यै नमो ह्रीं श्रीं बं ६ मां रक्ष २ मेदात्मने नमः ।

इति स्वाधिष्ठानकर्णिकायां तद्दलेषु बंधिन्यादीन् न्यसेत् ।

बं बंधिन्यै नमः ।

भं भद्रकाल्यै नमः ।

मं महामायायै नमः ।

यं यशस्विन्यै नमः ।

रं रक्तायै नमः ।

लं लंवोष्ठ्यै नमः ।

ततः—

मूलाधारस्थ पद्मे श्रुतिदललसिते पंचवक्त्रां त्रिनेत्राम् ।

धूम्राक्षामस्थिसंस्थांसृणिमपिकमलं पुस्तकं ज्ञानमुद्राम् ।।

विभ्राणां बाहुदंडैः सुललित वरदांपूर्वशक्त्यावृत्तांताम् ।

मुद्रान्नासक्त चित्तां मधुमदमुदितां साकिनीं भावयामः ।।

इति ध्यात्वाः-

सां सीं समल व र यूं साकिन्यै नमो ह्रीं श्रीं वं ४ मां रक्ष रक्ष अस्थ्यात्मने नमः। एवं मूलाधारकर्णिकायां न्यस्य दलचतुष्टये वरदाद्यां

न्यसेत् ।

वं वरदायै नमः ।

शं श्रियायै नमः ।

षं षंडायै नमः ।

सं सरस्वत्यै नमः ।

ततः—

भ्रूमध्ये बिन्दुपद्मे दलयुगकलिते शुक्लवर्णं कराब्जै

र्विभ्राणां ज्ञानमुद्रां डमरुकमलामलाक्षमालां कपालम् ।

षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादि युक्ताम्

हरिद्रान्नैकसक्तां सकलसुखकरीं हाकिनीं भावयामः ।

इति ध्यात्वा०-

हां हीं हमल वरयूं हाकिन्यै नमो ह्रीं श्रीं हं क्षं मां रक्ष रक्ष मज्जात्मने नमः।

इत्याज्ञास्थकर्णिकायां न्यस्य दलयोर्देव्यौ न्यसेत् ।

हं हंसवत्यै नमः ।

क्षं क्षमावत्यै नमः ।

ततः—

मुंड व्योमस्थपद्मेदशशतदलके कर्णिकाचन्द्रसंस्थाम् ।

रेतो निष्ठां समस्तायुध कलितकरां सर्वतो वक्त्रपद्माम् ।।

आदिक्षांतार्ण शक्तिप्रकरपरिवृत्तां सर्ववर्णां भवानीम् ।

सर्वान्नासक्तचित्तां परशिवरसिकां याकिनीं भावयामः ।।

इति ध्यात्वा०-

यां यीं यमल वरयूं याकिन्यै नमो ह्रीं श्रीं अं आं ५० मां रक्ष रक्षशुक्रात्मने नमः ।

इति ब्रह्मरन्ध्रस्थ सहस्रारकर्णिकायां न्यस्य अमृतादि क्षमावत्यांताः पंचाशद्देवता न्यसेत् ।

इति योगिनी न्यासः ।

अथ राशि न्यासः

रक्तं श्वेत हरित पांडु चित्रकृष्ण पिशंगकान् ।

कपिश बभ्रु किर्मिरकृष्ण धूम्रानिभान्क्रमात् स्मरेत् ।।

इति ध्यात्वा०-

अं आं इं ईं मेषाय नमः — दक्षपादे ।

उं ऊं ऋं वृषभाय नमः — लिङ्गे ।

ॠं लृं लॄं मिथुनाय नमः — दक्ष कुक्षौ ।

एं ऐं कर्काय नमः — हृदये ।

ओं औं सिंहाय नमः — दक्षबाहुमूले ।

अं अः शं षं सं हं लं कन्यायै — दक्षशिरोभागे ।

कं ५ तुलायै नमः — वामशिरोभागे ।

चं ५ वृश्चिकाय नमः — वामबाहुमूले ।

टं ५ धनुषे नमः — हृदये ।

तं ५ मकराय नमः — वाम कुक्षौ ।

पं ५ कुंभाय नमः — लिङ्गवामभागे ।

यं रं लं वं क्षिं मीनाय नमः — वामपादे ।

इति राशिन्यासः।

अथ पीठ न्यासः

सितासि[1]तारूण श्यामहरितपीतान्यक्रमात् ।

---

१. यह अंश नित्योत्सव से लिया गया है ।

पुनः क्रमेण देवेशि पञ्चाशत्पीठसञ्चयः ।।

अं कामरूपाय नमः - शिरसि ।

स्थानमुद्राश्च वहिर्मातृकावत्

आं वाराणस्यै नमः । - मुखवृत्ते ।।

इं नेपालाय नमः । - दक्षनेत्रे ।।

ईं पौंड्रवर्धनाय नमः । वामनेत्रे ।।

उं पुरस्थिराय नमः । दक्षकर्णे

ऊं कान्यकुब्जाय नमः । वामकर्णे ।।

ऋं पूर्णशैलाय नमः । दक्षनासापुटे ।।

ॠं अर्बुदाय नमः । वामनासापुटे ।।

ऌं आमातकेश्वराय नमः ।

ॡं एकाम्राय नमः । वामगण्डे ।।

एं त्रिस्रोतसे नमः । उर्ध्वोष्ठे ।।

ऐं कामकोटये नमः । अधरोष्ठे ।।

ओं कैलासाय नमः । उर्ध्वदन्तपंक्तौ ।।

औं भृगुनगराय नमः । अधोदन्तपक्तौ ।।

अं केदाराय नमः । जिह्वाग्रे ।।

अः चन्द्रपुष्कराय नमः । कण्ठे ।।

कं श्रीपीठाय नमः । दक्षबाहुमूले ।।

खं ओंकाराय नमः । दक्षकूर्परे ।।

गं जालन्धराय नमः । दक्षमणिवन्धे ।।

घं मालवाय नमः । कराङ्गलिमूले ।।

ङं कुलान्तकाय नमः । दक्षदक्षकरांगुल्यग्रे ।।

चं देविकोटाय नमः । वामबाहुमूले ।।

छं गोकर्णाय नमः । वामकूर्पटे ।।

जं मारुतेश्वराय नमः । — वाममणिवन्धे ।।

झं अट्टहासाय नमः । — वामकराङ्गुलिमूले ।।

ञं विरजाय नमः । — वामकराङ्गुल्यग्रे ।।

टं राजगेहाय नमः । — दक्षोरुमूले ।।

ठं महापथाय नमः·। दक्षजानुनि ।

डं कोलापुराय नमः । — दक्षगुल्फे ।।

ढं एलापुराय नमः । — दक्षपादाङ्गुलिमूले ।।

णं कोलेशाय नमः । — दक्षपादाङ्गुल्यग्रे ।।

तं जयंतिकायै नमः । — वामोरुमूले ।।

थं उज्जयिन्यै नमः । — वामजानुनि ।।

दं चित्राय नमः । — वामगुल्फे ।।

धं क्षीरकाय नमः । — वामपादाङ्गुलिमूले ।।

नं हस्तिनापुराय नमः । — वामपादाङ्गुल्यग्रे ।।प

पं उड्डीशाय नमः । — दक्षपार्श्वे ।।

फं प्रयागाय नमः । — वामपार्श्वे ।।

वं षष्ठीशाय नमः ·। — पृष्ठे ।।

भं मायापुर्यै नमः । — नाभौं ।।

मं जलेशाय नमः । — जठरे ।।

यं मलयाय नमः । — हृदये ।।

रं शैलाय नमः । — दक्षस्कन्धे ।।

लं मेरवे नमः ।— गलपृष्ठे ।।

वं गिरिवराय नमः । — वाम स्कन्धे ।।

शं महेन्द्राय नमः । — हृदयादिदक्षकराङ्गुल्यन्तम् ।।

षं वामनाय नमः । — हृदयादिवामकराङ्गुल्यन्तम् ।।

सं हिरण्यपुराय नमः । — हृदयादिदक्षपादाङ्गुल्यन्तम् ।।

हं महालक्ष्मीपुराय नमः । — हृदयादिवामपादाङ्गुल्यन्तम् ।।

कं ओंड्याणाय नमः । — हृदयादिगुह्यान्तम् ।।

क्षं छायाछत्रपीठाय नमः । — हृदयादिमूर्धान्तम् ।।

इति लघुषोढान्यासः ।

अष्टमः पटलः

अथ चक्रन्यासः

चतुस्त्र प्रथम रेखायै नमः ।

इत्यंजलिना मस्तकादि पादांतं व्यापकं विन्यस्य -

अणिमासिध्यै नमः — दक्षोरुसंधौ दक्षपाण्यंगुल्यग्रेषु ।

महिमा सिध्यै०

ईशित्वासिध्यै नमः — दक्षपादांगुल्यग्रेषु । — दक्षोरुसंधौ ।।

वशित्वा सिध्यै० — वाम पादांगुल्यग्रेषु ।

प्राकाम्या सिध्यै नमः वामोरुसंधौ ।

भुक्ति सिध्यै० नमः । — वाम पादांगुल्यग्रेषु ।

इच्छा सिध्यै नमः — वामांस पृष्ठे ।

प्राप्ति सिध्यै० — शिखामूले ।

सर्वकामसिध्यै० — शिरः पृष्ठे ।

चतुरस्त्र मध्यम रेखायै नमः ।

इति तदंर्व्यापकं न्यस्य-

ब्राह्मयै नमः — पादांगुष्ठद्वये ।

माहेश्वर्यै ममः — दक्ष पार्श्वे ।

कौमार्यै नमः शिरसि ।

वैष्णव्यै नमः — वामपार्श्वे ।

वाराह्यै नमः — वामजानुनि ।

इंद्राण्यै नमः — दक्षजानुनि ।

क्षांदसे नमः — ।

चामुंडायै नमः — ।

महालक्ष्म्यै नमः वामांसे ।

चतुरस्त्रांत्यरेखायै नमः ।

इति तदंतर्व्यापकं विन्यस्य —

द्रां सर्वसंक्षोभिण्यै — नमः पादांगुष्ठद्वये ।

द्रीं सर्वविद्राविणी मुद्रायै नमः — दक्षपार्श्वे ।

क्लीं सर्वाकर्षिणीमुद्रायै नमः — शिरसि ।

ब्लूँ सर्ववशंकरिमुद्रायै नमः — वाम पार्श्वे ।

सः सर्वोन्मादिनी मुद्रायै — वाम जानुनि ।

क्रों सर्वमहांकुश मुद्रायै० दक्ष जानुनिं ।

ह स ख फ्रें सर्व खेचरी मुद्रायै नमः — दक्षांसे ।

ह्रौं सर्वबीजमुद्रायै नमः : — वामांसे ।

ऐं सर्वयोनिमुद्रायै नमः — द्वादशांते ।

ह स्त्रैं ह स क ल रीं ह स्त्रौः सर्व त्रिखण्डामुद्रायै

नमः — पादांगुष्ठद्वये ।

ततः षोडशदलपद्माय नमः ।

इति तदंतर्व्यापकं विन्यस्य —

अं कामाकर्षिणी नित्याकलायै नमः — दक्ष कर्णपृष्ठे ।

आं बुध्याकर्षिणी नित्याकलायै नमः — दक्षांसे ।

इं अहंकाराकर्षिणी नित्याकलायै नमः — दक्षकूर्परे ।

ईं शब्दाकर्षिणी नित्याकलायै नमः — दक्षकरपृष्ठे ।

उं स्पर्शाकर्षिणी नित्याकलायै० नमः — दक्षोरौ ।

ऊं रूपाकर्षिणी नित्याकलायै० नमः — दक्षजानुनि ।

ऋं रसाकर्षिणी नित्याकलायै नमः — दक्षगुल्फे ।

ॠं गंधाकर्षिणी नित्याकलायै नमः — दक्षपादतले ।

लृं चित्ताकर्षिणी नित्याकलायै० नमः — वामपादतले ।

लॄं धैर्याकर्षिणी नित्या कलायै० नमः — वाम गुल्फे ।

एं स्मृत्याकर्षिणी नित्या कलायै० नमः — वामजानुनि

ऐं नामाकर्षिणी नित्या कलायै० नमः — वामोरौ ।

ओं बीजाकर्षिणी नित्याकलायै० नमः — वामकरपृष्ठे ।

औं आत्माकर्षिणी नित्याकलायै० नमः — वामकूर्परे ।

अं अमृताकर्षिणी नित्या कलायै० नमः — वामांसे ।

अः शरीराकर्षिणी नित्या कलायै० नमः — वामश्रोत्रपृष्ठे ।

ततः अष्टदलपद्माय नमः ।

इति तदंत व्यापकं विन्यस्य —

कं ५ अनंगकुसुमायै नमः — दक्ष शंखे ।

चं ५ अनंग मेखलायै नमः — दक्षवाहुमूल संधौ ।

टं ५ अनंगमदनायै नमः — दक्षोरौ ।

तं ५ अनंगमदनातुरायै नमः — दक्ष गुल्फे ।

पं ५ अनंगरेखायै नमः — वाम गुल्फे ।

यं ४ अंनगवेगिन्यै नमः — वामोरौ ।

शं ४ अंगांकुशायै नमः — वामबाहुमूलसंधौ ।

कं क्षं अनंग मालिन्यै नमः — वामशंखे ।

ततः चतुर्दशारचक्राय नमः ।

इति तदंतर्व्यापकं विन्यसेत् ।

टं सर्व क्षोभिंणीशक्त्यै नमः — ललाटे ।

ठं सर्वविद्राविणी शक्त्यै नमः — तद्दक्षभागे ।

डं सर्वाकर्षिणी शक्त्यै नमः — दक्षगंडे ।

ढं सर्वाह्लादिनी शक्त्यै० — दक्षांशमध्ये ।

णं सर्वसंमोहिनी शक्त्यै० दक्षपाश्र्वा ।

तं सर्व स्तम्भिनि शक्त्यै० — दक्षोरौ ।

थं सर्वजंभिनि शक्त्यै० ३ — दक्षजंघायां ।

दं सर्व वशंकरिणि शक्यै० — वामजंघायां ।

ततः,

धं सर्वरंजनि शक्त्यै० — वामोर्वतः

नं सर्वोन्मादिनि शक्त्यै० — वामपाश्र्वे ।

पं सर्वार्थसाधिनी शक्त्यै० — वामांसे ।

फं सर्वसम्पत्तिरूपिणी शक्त्यै० — वामगंडे ।

बं सर्वमन्त्रमयी शक्त्यै — ललाटवामभागे।

भं सर्वद्वन्द्वक्षयंकरि शक्त्यै — शिरः पृष्ठे।

ततः वहिर्दशार चक्राय नमः ।

तदंतर्व्यापकं कृत्वा,

कं सर्वसिद्धिप्रदादेव्यै नमः-दक्षनेत्रे ।

खं सर्वसम्पत्प्रदा देव्यै नमः — नासामूले ।

गं सर्वप्रियंकरी देव्यै० — वामनेत्रे ।

घं सर्वमंगलकारिणी देव्यै० — वामबाहुमूले ।

ङं सर्वकामप्रदादेव्यै नमः ५ वामोरुमूले ।

चं सर्वदुःखविमोचिनी देव्यै० — वामजानुनि ।

छं सर्वमृत्युप्रशमनी देव्यै० — गुदे ।

जं सर्वविघ्नविनाशिनी देव्यै० — दक्ष जानुनि ।

झं सर्वांगसुन्दरी देंव्यै — दक्षोरुमूले ।

ञं सर्वसौभाग्यदायिनी देव्यै० — दक्षबाहुमूले ।

ततः अन्तर्दशारचक्राय नमः ।

इति तदंतर्व्यापकं विन्यस्य,

मं सर्वज्ञादेव्यै० — दक्षनासापुटे ।

यं सर्वशक्तिदेव्यै० — दक्षसृक्कीण्यां ।

रं सर्वैश्वर्य प्रदायिनि देव्यै० — दक्ष स्तने ।

लं सर्वज्ञानमयी देव्यै० — दक्षमुष्के ।

बं सर्वव्याधिविनाशिनी देव्यै० — सीवन्यां ।

शं सर्वाधारस्वरूपा देव्यै० — वाममुष्के ।

षं सर्वपापहरा देव्यै० — वामस्तने ।

सं सर्वानन्दमयी देव्यै० — वामसृक्किण्यां ।

हं सर्वरक्षास्वतंरूपिणी देव्यै० — वाम नासापुटे ।

क्षं सर्वेप्सित फलप्रदा देव्यै० — नासाग्रे ।

ततः अष्टकोण चक्राय नमः

इति तदंतर्व्यापकं विन्यस्य अब्जां १६ ।

ब्लूं वशिनि वाग्देवतायै नमः ।

चिवुकदक्ष भागे ।

कं ५ क ल ह्रीं कामेश्वरी वाग्देवतायै० — कंठदक्षभागे ।

चं ५ क्लींव्यो देवी वाग्देवतायै० — हृदये ।

टं ५ प्लूं विमला वाग्देवतायै नमः — नाभिदक्षभागे ।

तं ५ इम्रीं अरुणी वाग्देवतायै० नमः — नाभिवामभागे ।

पं ५ ह् स् ल् व्यूं जयिनिवाग्देवतायै० — हृद्वामभागे ।

१४ इम्ग्रूं सर्वेश्वरी वाग्देवतायै० — कंठवामे ।

शं ६ क्ष्म्रीं कौलिनी वाग्देवतायै० — चिबुकवाम भागे ।

ह्रां ह्रीं क्लीं ब्लूं सः यां रां लां वां सर्वजंभृनेभ्यो

वाणेभ्यो० — हृन्निमनाथः ।

धं थं सर्वमोहनाभ्यां चापाभ्यां नमः — हृद्वामे ।

आं ह्रीं सर्ववशीकरणाभ्यां पाशाभ्यां नमः — निम्नोर्ध्वं ।

क्रों सर्वस्तम्भनाभ्यां अंकुशाभ्यां नमः — तद्दक्षभागे ।

ततः त्रिकोणचक्राय नमः ।

इति हृदि व्यापकं विन्यस्य —

कं कामेश्वर्यैं नमः — त्रिकोणाग्रकोणे ।

ह ६ वज्रेश्वर्यैं नमः — दक्षकोणे ।

सः ४ भगमालिन्यै नमः — उत्तरकोणे ।

ततः विन्दुचक्राय मूलं० श्रीमहात्रिपुरसुन्दर्यैं नमः ।

इत्यणिमादिचक्र न्यासः ।

अथ मूलदेव्यादिन्यासः ।

विन्दुचक्राय नमः ।

इति शिरस्थ त्रिकोणे ब्रह्मरन्ध्ररूप विंदौ व्यापकं कृत्वा ।

मूलं श्री महात्रिपुरसुन्दर्यैः०

ततः त्रिकोणचक्राय इति तद्बहिर्व्यापकं कृत्वा ।

क ५ कामेश्वर्यैं० — अग्रकोणे ।

ह ६ वज्रेश्वर्यैं नमः — दक्ष कोणे ।

स ४ भगमालिन्यै० — वाम कोणे ।

ततस्त्रिकोणचतुर्दिक्षु० ।

ह्रां ह्रीं क्लीं ब्लूं सः सर्व जंभनेभ्यः कामेश्वरी वाणेभ्यो नमः —

— वाम नेत्रे ।

धं सर्वसंमोहनाय कामेश्वरचापाय नमः — दक्षभ्रुवि ।

आं सर्व वशीकरणाय कामेश्वर पाशाय० दक्षकर्णे ।

ह्रीं सर्ववशीकरणाय कामेश्वरी पाशाय० — वामकर्णे ।

क्रों सर्वस्तम्भनाय कामेश्वरांकुशाय० —

— दक्षनासापुटे ।

क्रों सर्वस्तम्भनाय कामेश्वर्यांकुशाय नमः — वामनासापुटे ।

ततः अष्टकोणचक्राय नमः ।

इति शिरसि व्यापकं विन्यस्य ललाटादिप्रादक्षिण्येन वाग्देवताष्टकं न्यसेत्।

अं १६ ब्लूं वशिनीवाग्देवतायै नमः ।

कं ५ क ल ह्रीं कामेश्वरी वाग्देवता० ।

चं ५ न्ब्लीं मोदिनी० ।

टं ५ ल्यूं विमला वा० ।

तं ५ ज्म्रीं अरुणा वा० ।

पं ५ हसल् व्यूं जयिनी वा० ।

यं ४ झ्म्यूं सर्वेश्वरी वा० ।

शं ६ क्ष्म्रीं कौलिनी वागे० ।

ततः अन्तर्दशार चक्राय०

इति नेत्रादि प्रादक्षिण्येन व्यापकं कृत्वा —

सं सर्वज्ञा देव्यै नमः — दक्षनेत्र मूले ।

यं सर्वशक्ति देव्यै० — दक्षापांगे ।

रं सर्वैश्वर्यप्रदादेव्यै० — दक्षकर्णपूर्वभागे ।

लं सर्वज्ञानमयी दे० — दक्षकर्णोत्तरभागे ।

वं सर्वव्याधिविनाशिनी दे० — अपरगलनिम्नदक्षभागे ।

शं सर्वाधारस्वरूपा दे० — उत्तर भागे ।

षं सर्वपापहरा देव्यै ० — वामकर्णपृष्ठभागे ।

सं सर्वानन्दमयी देव्यै० — उत्तरभागे ।

हं सर्वरक्षास्वरूपिणी देव्यै० — वामापाङ्गे ।

क्षं सर्वेप्सितफलप्रदायै० — वामनेत्रमूले ।

ततः वहिर्दशारचक्राय नमः ।

इति कंठमूले व्यापकं कृत्वा —

कं सर्व सिद्धिप्रदादेव्यै० — कंठमूले तत्प्रादक्षिण्येन् ।

खं सर्वसम्पत्प्रदा देव्यै० ।

गं सर्वप्रियंकरि देव्यै० ।

घं सर्वमंगलकारिणी देव्यै० ।

ङं सर्वकामप्रदा देव्यै० ।

चं सर्वदुखविमोचिनी देव्यै० ।

छं सर्वमृत्युप्रशमनी दे० ।

जं सर्वविध्नविनाशिनी देव्यै० ।

झं सर्वाङ्गसुन्दरी दे० ।

ञं सर्वसौभाग्यदायिनी दे० ।

ततश्चतुर्दशारचक्राय ।

इति हृदि व्यापकं विन्यस्य प्रादक्षिण्येन न्यसेत् ।

टं सर्वसंक्षोभिणी शक्त्यै न० ।

ठं सर्वविद्राविणी शक्तये न० ।

डं सर्वाकर्षिणी शक्त्यै० ।

ढं सर्वाह्लादिनी श० ।

णं सर्वसंमोहिनी श० ।

तं सर्वस्तंभिनी श० ।

दं सर्ववशंकरि श० ।

धं सर्वरंजनीशक्त्यै नमः ।

नं सर्वोन्मादिनी शक्त्यै नमः ।

थं सर्वजंभिनी श० ।

पं सर्वार्थसाधिनी शक्त्यै नमः ।

फं सर्वसम्पत्तिकारिणी शक्त्यै० ।

बं सर्वमन्त्रमयी शक्त्यै० ।

भं सर्वद्वन्द्वक्षयंकरी शक्त्यै० ।

ततः अष्टदलपद्माय नमः ।

इति नाभौ व्यापकं कृत्वा ।

कं ५ अनंगकुसुमायै नमः — पृष्ठवंशे ।

पं ५ अनंगमेखलायै नमः — वाम पार्श्वे ।

टं ५ अनंग मदनायै० — उदरे ।

तं अनंगमदनातुरायै० — दक्षपार्श्वे ।

पं अनंगरेखायै० — पृष्ठवंशवामपार्श्वेअन्तराले ।

टं ५ अनंग मदनायै० — उदरे ।

तं अनंगमदनातुरायै० — दक्षपार्श्वे ।

पं अनंगरेखायै०— पृष्ठवंशवामपार्श्रेअन्तराले ।

यं ४ अनंगवेगिन्यै० वामपार्श्वोदरांतराले ।

शं ४ अनंगांकुशायै० — उदरदक्षपार्श्वांतराले ।

लं क्षं अनंगमालिन्यै० — दक्षपार्श्वपृष्ठांतराले ।

ततः षोडशदलपद्माय० ।

इति स्वाधिष्ठानेव्याप्य पूर्वदलमारभ्य प्रादक्षिण्येन दलेषु न्यसेत्।

अं कामाकर्षिणी नित्याकलायै० ।

आं बुध्याकर्षिणी नित्याकलायै० ।

इत्यादि ।

ततः मूलाधारे भूपुरचक्रं विचिंत्य चतुरस्त्रांत्यरेखायै० इति विन्यस्य–

द्रां सर्वसंक्षोभिणी मुद्रायै० पुरो भागे ।

द्रीं सर्व विद्राविणी मुद्रायै० — दक्षिणभागे ।

क्लीं सर्वाकर्षिणी मु० वंशे ।

ब्लूं सर्ववशंकरीमु० — वाम पार्श्वे ।

सः सर्वोन्मादिनी मुद्रायै — प्राग्दक्षिणां तराले ।

क्रों सर्वमहांकुशमुद्रायै० —दक्षिणप्रतीच्यांतराले ।

ह् स् खू फ्रें सर्वखेचरीमुद्रायै० — प्रत्यगुदगंतराले ।

ह्सौः सर्वबीज मु० — ईशान्यां ।

ऐं सर्वयोनि मु० — तदूर्ध्वं ।

ह स्त्रै ह् स् क् ल् ह्रीं ह स्त्रौः सर्वत्रिखण्डा

मु० — तदधः ।

ततः चतुरस्त्रमध्यमरेखायै०

इति दक्षिणजंघायां व्यापकं विन्यस्य० प्रागादिदिक्षुविदिक्षु च ।

ब्राह्मयादीन्नयसेत् ।

ब्राह्मीमातृकायै नमः — जंघापुरोभागै ।

माहेश्वरी मातृकायै० ---- तद्दक्षे ।

कौमारी मातृकायै० — तत्पश्चात् ।

वैष्णवी मातृकायै नमः — तद्वामे ।

वाराही मातृकायै० — तत्प्राग्दक्षांतराले० ।

इंद्राणी मातृकायै० — तद्दक्षपश्चांतराले ।

चामुंडामातृकायै० — तत्पश्चिमदिगंतराले ।

ततश्चतुरस्त्र प्रथम रेखायै नमः ।

इति वाम जंघायां व्यापकं विन्यस्य —

अणिमासिध्यै नमः — पुरतः ।

लघिमासिध्यै नमः — तद्वामे ।

महिमासिध्यै नमः — तत्पश्चात् ।

इशित्वासिध्यै नमः — तद्दक्षे ।

वशित्वासिध्यै नमः — तत्प्राग्वामांतराले ।

प्राकाम्यासिध्यै० — तद्वामपश्चांतराले ।

भुक्तिसिध्यै० — तत्पश्चिमदक्षांतराले ।

इच्छासिध्यै० —तद्दक्षपूर्वांतराले ।

प्राप्तिसिध्यै० — वामपादतले ।

सर्वकामसिध्यै० — दक्षपादतले ।

इति सृष्टिचक्र न्यासः ।

अथकरशुध्यायादिन्यासः

अं मध्यमाभ्यां० ।

आं अनामिकाभ्याम्० ।

सौः कनिष्ठिकाभ्याम्० ।

अं अंगुष्ठाभ्याम्० ।

आं तर्जनीभ्याम्० ।

सौः करतलकरपृष्ठाभ्याम्० ।

इतिकरशुद्धिन्यासः ।

ह्रीं क्लीं सौः देव्यात्मासनाय० । पादयोः ।

है ह्रूं क्लीं ह्स्रौः श्रीचक्रासनाय० — जंघयोः ।

ह्स्रैं ह स्क्लीं ह सौः सर्वमन्त्रासनाय-जानुनोः ।

ह्रीं क्लीं क्लें साध्यसिद्धाय० — मूलाधारे ।

इति चतुरासन न्यासः ।

ऐं हृदया० तर्जन्यादिभिस्त्रिर्हृदये ।

क्लीं शि० मध्यमानामिकाभ्यां० — शिरसि ।

सौं० शिखायै वषट् ।

अधोमुखांगुष्ठेन मुष्टिना शिखायां ऐं कवचाय हुं दशभिः कवचं

क्लीं नेत्रत्रयाय वौषट् ।

तर्जन्यादिभिस्त्रिभिर्नेत्रत्रये ।

सौः अस्त्राय फट् ।

तर्जनीमध्माभ्यामस्त्रं ।

इति रक्षाषडंगं न्यासः

अथ वाग्देवतान्यासः

अं १६ ब्लूं वशिनी वाग्देवतायै नमः — शीर्षादिललाटांतम् ।

कं ५ क ल ह्रीं कामेश्वरी वाग्देव० — ललाटादिभ्रूमध्यांतम्।

चं न्क्लीं मोदिनी वा० भ्रूमध्यादाकंठम् ।

टं प्लूं विमलावाग्देव० कंठादिहृदयांतम् ।

तं ५ ज्म्रीं अरुणावाग्देवता० हृदयान्नाभ्यांतम् ।

पं ह ल् ल्यूं जयिनीवा० — नाभ्यादिस्वाधिष्ठनांतम् ।

यं झ्रयूंसर्वेश्वरी वा०— स्वाधिष्ठानादिमूलाधारांतम् ।

शं ६ क्ष्म्रीं कौलिनीवाग्देव०— मूलाधारादिपादांतम् ।

अथ नवयोनिन्यासः

कं ५ नमः — वाम कर्णे ।

ह ६ नमः — दक्ष कर्णे ।

स ४ नमः — चिबुके ।

१ क नमः — वामशंखे ।

हं नमः — दक्षशंखे ।

स — आस्ये ।

२ क — वाम नेत्रे ।

ह — दक्ष नेत्रे ।

स ४ — नासायां ।

क ३ — वामांशे ।

ह — दक्षांसे ।

स — हृदि ।

क — वामकूपरि ।

ह ६ — दक्षकूपरि ।

स ४ — कुक्षौ

५ क ५ — वाम जानुनि ।

ह — दक्ष जानुनि ।

स ४ — अधः ।

क — वाम पादे ।

ह ६ — दक्ष पादे ।

स ४ — लिंगे ।

क ५ — वाम पार्श्वे ।

ह ६ — दक्ष पार्श्वे० ।

स ४ — हृदि ।

८ क ५ — वामस्तने ।

ह ६ — दक्षस्तने ।

सकल ह्रीं नमः — कंठे ।

इति योनि न्यासः ।

अथ विद्याक्षर न्यासः

कं नमः — मूर्ध्नि ।

एं नमः — गुह्ये ।

ईं नमः— हृदि ।

लं नमः — वामनेत्रे ।

ह्रीं नमः — दक्षनेत्रे ।

हं नमः — तृतीयनेत्रे ।

सं नमः — वामश्रोत्रे ।

कं नमः — दक्ष श्रोत्रे ।

हं नमः — मुखे ।

लं नमः — वामभुजे ।

ह्रीं नमः — दक्षभुजे ।

सं नमः — पृष्ठे ।

कं नमः — वाम जानुनि ।

ह्रीं नमः — नाभौ ।

इति विद्याक्षर न्यासः ।

इतः पुनः करशुध्यादिन्यासं चतुरासनं न्यासं रक्षाषडंगन्यासं च कुर्यात् । ततः

श्री कंठादिन्यासः

अस्य श्रीकंठादिमातृकान्यासस्य दक्षिणामूर्ति ऋषये नमः — शिरसि

गायत्री छंदसे नमः — मुखे ।

अर्धनारीश्वराय देवतायै नमो — हृदि ।

हल्भ्यो बीजेभ्यो — गुह्ये ।

स्वरेभ्यो नमः — पादयोः ।

विन्दुभ्यः कीलकाय नमः — सर्वाङ्गे ।

न्यासे विनियोगाय नमः करसंपुटे ।

ह्स्त्रां अंगुष्ठाभ्याम् नमः ।

ह्स्त्रीं तर्जनीभ्याम्० ।

ह्स्त्रूं मध्यमाभ्याम्० ।

ह्स्त्रैं अनामिकाभ्याम्० ।

ह्स्त्रौं कनिष्ठिकाभ्याम् ।

ह्स्त्रः करतलकरपृष्ठाभ्याम्० एरं हृदयादि ।। ध्यानं ।।

पाशांकुशवराक्षस्त्रक्पाणिंशीतांशुशेखरम् ।

त्र्यक्षंरक्तसुवर्णाभमर्धनारीश्वरं भजे ।।

ह्स्त्रौं अं पूर्णोदरियुक्ताय श्रीकंठेशाय नमः — मुखे ।

स्थानमुद्राश्च मातृकावत् ।

झौं आं विरजायुक्तायानंतेशाय नमः ।

झ्रौ इं शाल्मली युक्ताय सूक्ष्मेशाय नमः ।

ईं लोलाक्षीयुक्तायाधीशाय नमः ।

उं वर्तुलाक्षी युक्तायामेशाय नमः ।

ऊं ऊर्ध्वाधिकोणायुक्तायार्ध ईशाय नमः ।

ऋं दीर्घमुखीयुक्तायभारतीशाय नमः ।

ॠं गोमुखीयुक्ताय तिथीशाय नमः ।

ऌं दीर्घ जिह्वायुक्ताय स्थाण्वीशाय नमः ।

ॡं कुंडोदरियुक्ताय हरेशाय नमः ।

एं वं ऊर्ध्वकेशियुक्ताय झिंटीशाय० ।

ऐं विकृतमुखी युक्तायसौतिकेशाय नमः ।

ओं ज्वालामुखीयुक्ताय सद्योजातेशाय० ।

औं उल्कामुखी युक्तायानुग्रहेशाय नमः ।

अं श्रीमुखीयुक्तायायाक्रूरेशाय नमः ।

अः विद्यामुखीयुक्ताय महासेनेशाय न० ।

कं महाकाली युक्ताय क्रोधीशाय नमः ।

खं सरस्वतीयुक्ताय चंडेशाय नमः ।

गं सर्वसिद्धिगौरीयुक्ताय पंचांतकेशाय नमः ।

घं त्रैलोक्य विद्यायुक्ताय शिवोत्तमेशाय न० ।

ङ मंत्रशक्तियुक्ताय एकरुद्रेशाय न० ।

चं आत्मशक्तियुक्ताय कूर्मेशाय नमः ।

छं भूतमातृकायुक्ताय एकनेत्रेशाय नमः ।

जं लम्बोदरि युक्ताय चतुराननेशाय नमः ।

झं द्राविणीयुक्तायाजेशाय० ।

ञं नागरीयुक्ताय शर्वेशाय० ।

टं खेचरीयुक्ताय सोमेशाय० ।

ठं मंजरीयुक्ताय लांगलीशाय० ।

डं रूपिणीयुक्ताय दारुकेशाय न० ।

ढं वारिणी युक्तायार्धनारीशाय नमः ।

णं काकोदरियुक्ता उमाकांतेशाय नमः ।

तं पूतनायुक्तायाषाढ़ीशाय० ।

थं भद्राकालीयुक्ताय दंडीशाय नमः ।

दं योगिनीयुक्तायत्रीशाय नमः ।

धं शंखिनीयुक्ताय मीनेशाय नमः ।

नं गर्जनीयुक्ताय मेषेशाय० ।

पं कालरात्रियुक्ताय लोहितेशाय० ।

फं कुब्जिनीयुक्ताय शिखीशाय० ।

बं कपर्दिनीयुक्ताय गलंडेशाय० । .

भं वज्रपाणी युक्ताय द्विरंडेशाय० ।

यं सुमुखीयुक्तायवालीशाय० ।

रं रेवती युक्ताय भुंजगेशाय० ।

लं माधवीयुक्ताय पिनाकीशाय० ।

वं वारिणीयुक्ताय खड्गीशाय० ।

शं वायवीयुक्ताय बकेशाय०

षं रक्षोवधीरिणीयुक्ताय श्वेतेशाय० ।

सं सहजायुक्ताय भग्वीशाय० ।

हं लक्ष्मीयुक्ताय कुलीशाय न० ।

ळं व्यापिनी युक्ताय शिवेशाय नमः ।

क्षं महामायायुक्तायसंवर्त्तकेशाय० ।

इति श्रीकण्ठादि न्यासः ।

इतः पुनर्वाग्देवतान्यांसं कुर्यात् ।

अथ अग्निचक्रादि न्यासः

क ५ अग्निचक्रेकामरूपपीठे मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठाये च्छाशक्त्यात्मक रुद्रात्मशक्ति श्रीकामेश्वरी देव्यै न० मूलाधारे।

ह ६ सूर्यचक्रे जालंधरपीठेषष्ठीशनाथात्मके स्वप्नद शाधिष्ठाय-कज्ञानात्मक श्रीविष्णवात्मशक्ति श्रीबज्रेश्वरी देव्यै नमः-हृदये ।

स ४ सोमचक्रे पूर्णागिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायक क्रियाशक्त्यात्मक ब्रह्मात्मकशक्ति श्री भगमालिनी देव्यै नमः ।

आज्ञायां मूलं समस्तब्रह्मचक्रे ओड्याणपीठे चर्यानन्दनाथात्मके तुर्यदशाधिष्ठायक परब्रह्मात्मशक्तिश्रीमहात्रिपुरसुन्दरी देव्यै नमः ब्रह्मरन्ध्रे।

इत्यग्निचक्रादि न्यासः ।

पर न्यासः

क ५ आत्मतत्त्वाय० पादादिनाभ्यंतम् ।

ह ६ विद्यातत्त्वाय० नाभ्यादिगलांतम् ।

स ४ शिवतत्त्वाय० कंठादिशिरोंतम् ।

मूलं तत्त्वाय नमः व्यापकम् ।

इति तत्त्वन्यासः।

ततोमूलाधारस्य कुंडलिनीं सहस्रारस्थामृतं कुंडलिं न्यासं मेल्य तदगलित सौम्याग्नेयामृतधारासारैरानंदानुभवं विभावयेत् ।

इति परन्यासः।

अथ चक्रेश्वरी न्यासः ।

अं आं सौः पादाग्रयोः ।

ऐं क्लीं सौः जंघयोः ।

ह्रीं क्लीं सौः जानुनोः ।

मूलेन सर्वांगे व्यापकं न्यसेदिति न्यासांतरमाह ।

अं आं सौः त्रिपुरासहिताय त्रैलोक्यमोहनचक्राय० अकुले ।

ऐं क्लीं सौः त्रिपुरेश्वरीसहिताय सर्वाशापरिपूरक चक्राय० ।

ह्रीं क्लीं सौः त्रिपुरसुन्दरी सहिताय सर्वसंक्षोभण चक्राय० ।

हैं ह क्लीं ह्सौः त्रिपुरवरासिनी सहिताय सर्व सौभाग्यदायकचक्राय स्वाधिष्ठाने ।

त्झैं त्झक्लीं त्झौः त्रिपुराश्रीसहिताय सर्वार्थसाधकचक्राय० मणिपूरे ।

ह्रीं क्लीं क्लें त्रिपुरमालिनी सहिताय सर्वरक्षाकरचक्राय० अनाहते ।

लू रीं ह त्रिपुराम्बिकासहिताय सर्वसिद्धिप्रदचक्राय नमः इंद्रयोन्यंबा मूलं महात्रिपुरसुन्दरीसहिताय सर्वानन्दमय चक्राय० आज्ञायां ।

इति करशुध्यादि षोडशन्यासः ।

अथ महाषोढ़ान्यास :

षोडशाक्षर्युपासकानां तु कश्चिद्विशेषः मातृकान्यासास्त्रयो ऋष्यादयो द्वाविंशतिः।

पूर्वाषोढ़ान्यासश्चेत्येकत्रिंशन्यासान्कृत्वा०

सौभाग्यादि द्वादश न्यासं कुर्यात् ।

सौभाग्यादि द्वादश न्यासः

स्त्रवत्सुधां षोडशार्णां सम्पूर्णां विद्यां ब्रह्मरन्ध्रे ।

विचिंत्य वामांसे मुक्त तर्जनीकं करं भ्रामयित्वा ।।

गर्भितांगुष्ठमुष्टि पादयोर्न्यस्य त्रैलोकस्याहं

कर्त्रेति संचित्य मुष्टिं तिलके न्यसेत् ।।

इति सौभाग्य न्यासः ।

अथ त्रैलोक्य क्षोभणन्यासः

छं छं छं ऊँ छं छं छं ऊँ छं छं छं छं छं छं सम्पूर्णविद्या व्यापकत्वेन वदने० २ मूलं गलादि शिरोंतं मूलं गलादापदं ततो योनिमुद्रां मुखे न्यस्य नमस्कुर्यात् ।

इति त्रैलोक्य क्षोभण न्यासः ।

अथ सम्मोहनन्यासः

३ ३ दक्षहस्ताद्यनामिकां परितो मूर्धानं परिभ्राम्य० मणिबन्धे न्यस्य वामहस्तीयामपि अनामिकाभ्यां तथैव दक्षिणमणिबन्धे न्यस्य पुनर्दशहस्तीयां ब्रह्मरन्ध्रे न्यस्य ललाटे तां क्षिप्त्वा त्रैलोक्यमरुणं ध्यायन् सम्पूर्णं मूलं मनसा स्मरेत् ।

इति सम्मोहन न्यासः ।।३४।।

अथाक्षरशोन्यासः

संहार न्यासः

२ श्रीं नमः पादयोः

२ ह्रीं नमः जंघयोः ।

२ क्लीं नमः जान्वोः ।

२ ऐं नमः कप्योः ।

२ सौ नमः लिङ्गे ।

२ ऊँ नमः पृष्ठे ।

२ ह्रीं नमः नाभौ ।

२ श्रीं नमः पार्श्वयोः ।

२ कं नमः स्तनयोः ।

२ हं ६ नमः अंसयोः ।

२ सं ४ नमः कर्णयोः ।

२ सौः नमः ब्रह्मरन्ध्रे ।

२ ऐं नमः वदने ।

२ क्लीं नमः चक्षुषोः ।

२ ह्रीं नमः कर्णोपरि भागयोः ।

श्रीं नमः व्यापकत्वेन करयोः ।

पादयोर्जघयोर्जान्वोःस्कंधे लिंगे च पृष्ठके ।

नाभौ च पार्श्वयोश्चैव स्तनयोरुरसिस्तत ः ॥

कर्णयोर्ब्रह्मरंध्रे च वदने चैव चक्षुषोः ।।

कर्णोर्ध्वभागयोश्चैव करयोर्व्यापकत्वतः ।।

स्थानेषु षोडशस्वेषु षोडशैकैकमक्षरम् ।

नमोंतं विन्यसेल्लज्जारमाबीजादिकं बुधः ।।

इति संहार न्यास ।।३५।।

अथ सृष्टिन्यासः

ब्रह्मरन्ध्रे ललाटे च नेत्रयोः कर्णयोर्नसोः ।

ओष्ठयोरधरे दंते दंतोर्ध्व रसनेन्द्रिये ।।

चोरकूर्पे च पृष्ठे च सर्वाङ्गे हृदये स्तने ।

कुक्षौ लिङ्गे न्यसेत् वर्णान् पूर्ववत् सुटितान्बुधः ।.

प्रयोगपूर्ववत् क्रियताम् ।

इति सष्टि न्यासः ।।३६।।

अथ स्थिति न्यासः

करांगुष्ठयुग्मेन ब्रह्मरन्ध्रे मुखे हृदि ।

नाभ्यादि पाद पर्यन्तं गलान्नाभ्यंतं मे बचः ।।

पूर्वादिकं ठं पर्यन्तं पादांगुष्ठादि पंचसु ।

पूर्ववद्विन्यसेत् वर्णान्स्थिति न्यासोऽयमीरितः ।।

ह्रीं श्रीं श्रीं नमः करांगुष्ठयोः ।

२ ह्रीं नमः त्तर्जन्योः ।

ऊँ क्लीं नमःकरमध्यमयोः ।

इत्यादि रीत्या प्रयोगो द्रष्टव्यः ।

इति स्थितिन्यासः ।।३७।।

अपर सौभाग्यन्यासः

मूर्ध्निनेत्रेवाम नेत्रे दक्षिणी नयने ।

वाम कर्णे दक्ष कर्णे वामनासापुटे।

ततः दक्षनासापुटे वामगंडे च दक्षिणे ऊर्ध्वोष्ठे वाधरोष्ठे च

मुखान्ते चोर्ध्वदन्तयोः अधोदंत द्वयेव वक्रेवर्णान्वै पूर्ववन्नयसेत्।

इत्यपरः सौभाग्य न्यासः ।।३८।।

मुखकरन्यासः

ऊँ श्रीं ऐं क्लीं ह्रीं क ५ ऊँ ह्रीं श्रीं क्लीं ऐं ह ६ ऐं श्रीं क्लीं ह्रीं ह क ल ऐं ह्रीं ह क ह ल ह्रीं ह ए क ल ह्रीं ऊँ ऐं क्लीं श्रीं ह्रीं क ह ल ए ह्रीं क ह य ल ह्रीं क ह ह ल ह्रीं हंसः ऊँ ह्रीं श्रीं हुं सोहं सः ४ इति दीपिनि

ब्रह्मरन्ध्रे च सीमन्ते ललाटे च भ्रुवोर्नसोः ।

मुखेदक्षिणांगस्थे जत्रुदेशे च कूर्पयोः ।।

प्रकोष्टेंऽगुलिमूलेंऽगुल्यग्रेऽथो वामभागयोः ।

जत्रादिपंचके वर्णान्पूर्वरद्विन्यसेत् सुधीः ।।

इति मुखकर न्यासः ।।३९।।

मुखपाद न्यास

ब्रह्मरन्ध्रे च सीमन्ते ललाटे हृदये मुखे ।

जिह्वायामथ दक्षांगस्योरौ जानुनि गुल्फके ।।

अंगुलीनां च मूलाग्रे वामे पूर्वादि पंचसु ।

एकैकशो न्यसेत् वंर्णान्पूर्ववत्सुटितान्बुधः ।।

इति मुखपादन्यासः ।।४०।।

वक्रन्यासः

अथ वक्रे स्वर स्थाने मातृका न्यासः न्यसेत् ।।

इति वक्रन्यासः ।

महासौभाग्यन्यासः

ललाटे गले हृन्नाभिमूलेषु ब्रह्मरन्ध्रके ।

मुखे वस्तौ च मूले च हृदये ब्रह्मरन्ध्रके ।

दक्षहस्ते वामहस्ते दक्षांध्रौ वामपादके ।

हृदये च न्यसेद्वर्णान्पूर्बवत्सुटितान् सुधीः ।।

इति सौभाग्यन्यासः ।।४२।।

ततो हृल्लेखारमाद्यां नमोंतासं पूर्णां विद्यां हृदये न्यसेत् ।

इति षोडशार्णं न्यसेत् ।।४३।।

ततः पूजापीठपूजां न्यासं पूर्वोक्तं कूर्यात् एवं शोडश्युपासकानां चतुश्चत्वारिंशं न्यासाः नित्या ।

ततः अन्तर्यागः पूर्ववत् नित्यजपेतु विशेषः कुल्लुका सेतु महासेतु निर्वाणो कीलन संजीवन प्राणदीपन पूर्ववज्जप्त्वा ।

कामेश्वर मन्त्र —

ऐं क्लीं सौः ऊँ श्रीं ह्रीं ह स क्ष म ल यूं स ह क्ष म ल ब र यूं य र ल व क्ष म यूं ऊँ ह्रीं श्रीं औं सौः क्लीं ऐं ।

इति चतुस्त्रिंशदक्षरं कामेश्वरमन्त्र मुक्तपक्षेषु यथाशक्ति जपेत् ।ततः पंचदशीं त्रिर्जपेत् ।

ततः षोडशीं त्रिः ।

ऐं सौः क्लीं वालायै नमः ।— इत्यष्टाक्षरवालामन्त्रं त्रिः

ऐं क्लीं उच्छिष्ट चांडालिनी सुमुखी देवी महापिशाचिनी ह्रीं ठः ठः ठः स्वाहा ।।

इति षडिवंशत्यक्षरं सुमुखि मन्त्रं त्रिः ।

उग्रतारा:

ऊँ ह्रीं स्त्रीं हूं क्रीं श्रीं उग्रतारे सौः क्लीं ह्रीं श्रीं स्वाहा ।

इति षोडशार्णां उग्रतारा मंत्रं त्रिः जपेत् ।

एतें पंशदश्यादयः पंच मंत्राः पंचरत्न पदेन मन्त्रशास्त्रे व्यवह्रीयन्ते ।

ततः सूतकापहाराय प्रणवपुटितां षोडशीं सप्तवारं जपेत् ।

एवं सर्वाङ्गभूताः पंचदश मन्त्राः जप्तव्याः कुम्भोत्तर नवमुद्राः प्रदर्श्य दशमत्रिखण्डा मुद्राशेषं पूर्ववत् ।।